# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ८** (C.E.-1.1.2. Old) | **गुणाः – ७०** |
| विषयः – रामानुजवेदान्तः | | |
| दिनाङ्कः – २२/१२/२०१८ | *ग्रन्थः ईश–केन–मुण्डकोपनिषदः* | **समयः –२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ मन्त्रद्वयं यथाभाष्यं व्याख्येयम् ।** **( १० )**

*(१) यस्यामतं तस्य मतं मतं यस्य न वेद सः ।*
*अविज्ञातं विजानतां विज्ञातमविजानताम् ॥*

*(२) प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।*
*आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥*

*(३) नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।*
*यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥*

**प्रश्नः २ एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं देयम् ।** **( १० )**

*(१) ध्यानद्वारा भगवतः दिव्यमङ्गलस्वरूपं वर्णयत ।*

*(२) कर्मणः स्वरूपं निरूपयत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ मन्त्रद्वयं यथाभाष्यं व्याख्येयम् ।** **( १० )**

*(१) अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया ।*
*इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे ॥*

*(२) सम्भूतिं च विनाशं च यस्तद् वेदोभयं सह ।*
*विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥*

*(३) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।*
*तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥*

**प्रश्नः ४ एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं प्रदेयम् ।** **( १० )**

*(१) यक्षोपाख्यानं वर्णयत ।*

*(२) परब्रह्मणः उपासनाप्रकारं स्फोरयत ।*

## तृतीयान्वितिः

**प्रश्नः ५ मन्त्रद्वयं यथाभाष्यं व्याख्येयम् ।** **( १० )**

*(१) यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।*

*तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥*

*(२) यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ।*

*तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् ॥*

*(३) भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।*

*क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥*

**प्रश्नः ६ एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं प्रदयेम् ।** **( १० )**

*(१) परमेश्वरस्य जगत्कारणत्वं सदृष्टान्तं द्योतयत ।*

*(२) ब्रह्मविद्यायाः उपदेशपरम्परां विशदयत ।*

## चतुर्थान्वितिः

**प्रश्नः ७ दशानामतिलघूत्तराणि यच्छत ।** **( १० )**

*(१) द्वितीयमुण्डके कति खण्डाः सन्ति ?*

*(२) का विद्या ?*

*(३) अणुरूपः कः ?*

*(४) वरिष्ठः कः ?*

*(५) सर्वज्ञः कः ?*

*(६) का उमा ?*

*(७) यक्षः कः ?*

*(८) केन विन्दतेऽमृतम् ?*

*(९) कति प्राणाः ?*

*(१०) कति गुणाः ?*

*(११) भूतानि कति ?*

*(१२) तत्त्वं कति ?*

*(१३) मातरिश्वा कः ?*

*(१४) जीवः नित्यः न वा ?*

*(१५) रामानुजवेदान्तस्य कर्ता कः ?*

--oo--